( पञ्चमः पाठः। ) ५. प्रार्थना-स्थानानि।



अयं देवालयः।
अत्र हिन्दुबान्धवाः देवं नमन्ति, देवं पूजयन्ति, देवं प्रार्थयन्ते च।



इदं 'मस्जिद्' नाम प्रार्थना - स्थानम्। अत्र मुस्लिमबान्धवाः महम्मदं स्मरन्ति। नमाजम् अपि पठन्ति।



इदं 'गुरुद्वारा' नाम मन्दिरम्। अत्र सिक्खबान्धवाः गुरुं नमन्ति। 'गुरुग्रन्थसाहिबा' इति ग्रन्थस्य पठनं कुर्वन्ति।



इयम् 'अग्यारी'। अग्निमन्दिरम्। अत्र पारसिकबान्धवाः अग्निदेवतां पूजयन्ति, 'अहुरमज्दं' स्मरन्ति च।



इदं 'चर्च' नाम प्रार्थनास्थलम्। 'क्रॉस'-प्रतीकेन ख्रिश्चनबान्धवाः 'येशूख्रिस्तं' प्रणमन्ति, प्रार्थयन्ते च।

बौद्धानां विहाराः सन्ति। जैनानां मन्दिराणि सन्ति।

इमे हिन्दु-मुस्लिम-सिक्ख-पारसिक-ख्रिश्चन-बौद्ध-जैन-बान्धवाः भारते वसन्ति। स्वधर्मपालनं कुर्वन्ति सर्वे।

इदमेव भारतीयसंस्कृतेः विशेषं भूषणम् अस्ति। इमे सर्वे भारतीयाः एव। जयतु भारतराष्ट्रम्।

## (द्वादशः पाठः।) १२. प्राणिवनम्।



मम स्वप्ने एकं प्राणिवनम्
प्राणिवनं रे प्राणिवनम्।। धृ।।



हरिणाः शशकाः व्याघ्रादयः
खेलन्ति रे बुद्धिबलम्।।१।।
तत्र शृगालः वितरति दुग्धम्
मधुरं धवलं रे दुग्धम्।।२।।



मर्कट उष्ट्रः सिंहो हस्ती
कूर्दति धावति चलति स्वपिति।।३।।
गर्दभः करोति स्वरगानम्
सा रे ग म प ध नि सा।
सा नि ध प म ग रे सा
गर्दभः करोति आलापनम्।।४।।



श्वानः मूषकः अश्वः महिषः।
भू-भू, चीं चीं, हीं हीं, आँ- आँ,।।५।।
अभिनयं करोति मार्जारः



रसिकः च अस्ति दर्दुरः।
म्याव् म्याव्, डराँव् डराँव्
जागरितोऽहं हा हा हा।।६।।